Shivananda Lahari

शिवानन्दलहरी

SHLOKA · श्लोक

1

कलाभ्यां चूडालंकृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुन-
र्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम्॥

Kalabhyam chudalankrita shashi kalabhyam nija tapah-
Phalabhyam bhakteshu prakatita phalabhyam bhavatu me.
Shivabhyam astoka tribhuvana shivabhyam hridi puna-
Rbhavabhyam ananda sphurad anubhavabhyam natir iyam.

2

गलन्ती शंभो त्वच्चरितसरितः किल्बिषरजो
दलन्ती धीकुल्यासरणिषु पतन्ती विजयताम्।
दिशन्ती संसारभ्रमणपरितापोपशमनं
वसन्ती मच्चेतोह्रदभुवि शिवानन्दलहरी॥

Galanti Shambho tvach charita saritah kilbisha rajo
Dalanti dhikulya saranishu patanti vijayatam.
Dishanti sansara bhramana paritapopashamanam
Vasanti mach cheto hrada bhuvi Shivananda lahari.

3

त्रयीवेद्यं हृद्यं त्रिपुरहरमाद्यं त्रिनयनं
जटाभारोदारं चलदुरगहारं मृगधरम्।
महादेवं देवं मयि सदयभावं पशुपतिं
चिदालम्बं साम्बं शिवमतिविडम्बं हृदि भजे॥

Trayi vedyam hridyam tripuraharam adyam trinayanam
Jata bharodaram chalad uraga haram mriga dharam.
Mahadevam devam mayi sadaya bhavam Pashupatim
Chid alambam Sambam Shivam ati vidambam hridi bhaje.

4

सहस्रं वर्तन्ते जगति विबुधाः क्षुद्रफलदा
न मन्ये स्वप्ने वा तदनुसरणं तत्कृतफलम्।
हरिब्रह्मादीनामपि निकटभाजामसुलभं
चिरं याचे शंभो शिव तवाम्भोजभजनम्॥

Sahasram vartante jagati vibudhah kshudra phalada
Na manye svapne va tad anusaranam tat krita phalam.
Hari Brahmadinam api nikata bhajam asulabham
Chiram yache Shambho Shiva tavambhoja bhajanam.

5 स्मृतौ शास्त्रे वैद्ये शकुनकविता‌गानफणितौ
पुराणे मन्त्रे वा स्तुतिनटनहास्येष्वचतुरः।
कथं राज्ञां प्रीतिर्भवति मयि कोऽहं पशुपते
पशुं मां सर्वज्ञ प्रथितकृपया पालय विभो॥

Smritau shastre vaidye shakuna kavita gana phanitau
Purane mantre va stuti natana hasyeshv achaturah.
Katham rajnam pritir bhavati mayi koham Pashupate
Pashum mam sarvajna prathita kripaya palaya vibho.

6 घटो वा मृत्पिण्डोऽप्यणुरपि च धूमोऽग्निरचलः
पटो वा तन्तुर्वा परिहरति किं घोरशमनम्।
वृथा कण्ठक्षोभं वहसि तरसा तर्कवचसा
पदाम्भोजं शंभोर्भज परमसौख्यं व्रज सुधीः॥

Ghato va mrit pindopy anur api cha dhumognir achalah
Pato va tantur va pariharati kim ghora shamanam.
Vritha kantha kshobham vahasi tarasa tarka vachasa
Padambhojam Shambhor bhaja parama saukhyam vraja sudhih.

7 मनस्ते पादाब्जे निवसतु वचः स्तोत्रफणितौ
करौ चाभ्यर्चायां श्रुतिरपि कथाकर्णनविधौ।
तव ध्याने बुद्धिर्नयनयुगलं मूर्तिविभवे
परग्रन्थान्कैर्वा परमशिव जाने परमतः॥

Manas te padabje nivasatu vachah stotra phanitau
Karau chabhyarchayam shrutir api katha karnana vidhau.
Tava dhyane buddhir nayana yugalam murti vibhave
Para granthan kair va Paramashiva jane paramatah.

8 यथा बुद्धिः शुक्तौ रजतमिति काचाश्मनि मणि-
र्जले पैष्टे क्षीरं भवति मृगतृष्णासु सलिलम्।
तथा देवभ्रान्त्या भजति भवदन्यं जडजनो
महादेवेशं त्वां मनसि च न मत्वा पशुपते॥

Yatha buddhih shuktau rajatam iti kachashmani mani-
Rjale paishte kshiram bhavati mriga trishnasu salilam.
Tatha deva bhrantya bhajati bhavad anyam jadajano
Mahadevesham tvam manasi cha na matva Pashupate.

9 गभीरे कासारे विशति विजने घोरविपिने
विशाले शैले च भ्रमति कुसुमार्थं जडमतिः।
समर्प्यैकं चेतःसरसिजमुमानाथ भवते
सुखेनावस्थातुं जन इह न जानाति किमहो॥

Gabhire kasare vishati vijane ghora vipine
Vishale shaile cha bhramati kusumartham jadamatih.
Samarpyaikam chetah sarasijam Umanatha bhavate
Sukhenavasthatum jana iha na janati kim aho.

10 नरत्वं देवत्वं नगवनमृगत्वं मशकता
पशुत्वं कीटत्वं भवतु विहगत्वादिजननम्।
सदा त्वत्पादाब्जस्मरणपरमानन्दलहरी-
विहारासक्तं चेद्धृदयमिह किं तेन वपुषा॥

Naratvam devatvam naga vana mrigatvam mashakata
Pashutvam kitatvam bhavatu vihagatvadi jananam.
Sada tvat padabja smarana paramananda lahari-
Viharasaktam ched dhridayam iha kim tena vapusha.

11 वटुर्वा गेही वा यतिरपि जटी वा तदितरो
नरो वा यः कश्चिद्भवतु भव किं तेन भवति।
यदीयं हृत्पद्मं यदि भवदधीनं पशुपते
तदीयस्त्वं शंभो भवसि भवभारं च वहसि॥

Vatur va gehi va yatir api jati va tad itaro
Naro va yah kashchid bhavatu bhava kim tena bhavati.
Yadiyam hrit padmam yadi bhavad adhinam Pashupate
Tadiyas tvam Shambho bhavasi bhava bharam cha vahasi.

12 गुहायां गेहे वा बहिरपि वने वाद्रिशिखरे
जले वा वह्नौ वा वसतु वसतेः किं वद फलम्।
सदा यस्यैवान्तःकरणमपि शंभो तव पदे
स्थितं चेद्योगोऽसौ स च परमयोगी स च सुखी॥

Guhayam gehe va bahir api vane vadri shikhare
Jale va vahnau va vasatu vasateh kim vada phalam.
Sada yasyaivantahkaranam api Shambho tava pade
Sthitam ched yogosau sa cha parama yogi sa cha sukhi.

13 असारे संसारे निजभजनदूरे जडधिया
भ्रमन्तं मामन्धं परमकृपया पातुमुचितम्।
मदन्यः को दीनस्तव कृपणरक्षातिनिपुण-
स्त्वदन्यः को वा मे त्रिजगति शरण्यः पशुपते॥

Asare sansare nija bhajana dure jadadhiya
Bhramantam mam andham parama kripaya patum uchitam.
Mad anyah ko dinas tava kripana rakshati nipuna-
Stvad anyah ko va me trijagati sharanyah Pashupate.

14 प्रभुस्त्वं दीनानां खलु परमबन्धुः पशुपते
प्रमुख्योऽहं तेषामपि किमुत बन्धुत्वमनयोः।
त्वयैव क्षन्तव्याः शिव मदपराधाश्च सकलाः
प्रयत्नात्कर्तव्यं मदवनमियं बन्धुसरणिः॥

Prabhus tvam dinanam khalu parama bandhuh Pashupate
Pramukhyoham tesham api kim uta bandhutvam anayoh.
Tvayaiva kshantavyah Shiva mad aparadhash cha sakalah
Prayatnat kartavyam mad avanam iyam bandhu saranih.

15 उपेक्षा नो चेत्किं न हरसि भवद्ध्यानविमुखां
दुराशाभूयिष्ठां विधिलिपिमशक्तो यदि भवान्।
शिरस्तद्वैधात्रं ननखलु सुवृत्तं पशुपते
कथं वा निर्यत्नं करनखमुखेनैव लुलितम्॥

Upeksha no chet kim na harasi bhavad dhyana vimukham
Durasha bhuyishtham vidhi lipim ashakto yadi bhavan.
Shiras tad vaidhatram nanakhalu suvrittam Pashupate
Katham va niryatnam kara nakha mukhenaiva lulitam.

16 विरिञ्चिर्दीर्घायुर्भवतु भवता तत्परशिर-
श्चतुष्कं संरक्ष्यं स खलु भुवि दैन्यं लिखितवान्।
विचारः को वा मां विशद कृपया पाति शिव ते
कटाक्षव्यापारः स्वयमपि च दीनावनपरः॥

Virinchir dirghayur bhavatu bhavata tat para shira-
Shchatushkam sanrakshyam sa khalu bhuvi dainyam likhitavan.
Vicharah ko va mam vishada kripaya pati Shiva te
Kataksha vyaparah svayam api cha dinavana parah.

17 फलाद्वा पुण्यानां मयि करुणया वा त्वयि विभो
प्रसन्नेऽपि स्वामिन् भवदमलपादाब्जयुगलम्।
कथं पश्येयं मां स्थगयति नमःसंभ्रमजुषां
निलिम्पानां श्रेणिर्निजकनकमाणिक्यमकुटैः॥

Phaladva punyanam mayi karunaya va tvayi vibho
Prasannepi svamin bhavad amala padabja yugalam.
Katham pashyeyam mam sthagayati namah sambhrama jusham
Nilimpanam shrenir nija kanaka manikya makutaih.

18 त्वमेको लोकानां परमफलदो दिव्यपदवीं
वहन्तस्त्वन्मूलां पुनरपि भजन्ते हरिमुखाः।
कियद्वा दाक्षिण्यं तव शिव मदाशा च कियती
कदा वा मद्रक्षां वहसि करुणापूरितदृशा॥

Tvam eko lokanam parama phalado divya padavim
Vahantas tvan mulam punar api bhajante Hari mukhah.
Kiyad va dakshinyam tava Shiva mad asha cha kiyati
Kada va mad raksham vahasi karuna purita drisha.

19 दुराशाभूयिष्ठे दुरधिपगृहद्वारघटके
दुरन्ते संसारे दुरितनिलये दुःखजनके।
मदायासं किं न व्यपनयसि कस्योपकृतये
वदेयं प्रीतिश्चेत्तव शिव कृतार्थाः खलु वयम्॥

Durasha bhuyishthe duradhipa griha dvara ghatake
Durante sansare durita nilaye duhkha janake.
Mad ayasam kim na vyapanayasi kasyopakritaye
Vadeyam pritish chet tava Shiva kritarthah khalu vayam.

20 सदा मोहाटव्यां चरति युवतीनां कुचगिरौ
नटत्याशाशाखास्वटति झटिति स्वैरमभितः।
कपालिन् भिक्षो मे हृदयकपिमत्यन्तचपलं
दृढं भक्त्या बद्ध्वा शिव भवदधीनं कुरु विभो॥

Sada mohatavyam charati yuvatinam kucha girau
Natatyasha shakhasv atati jhatiti svairam abhitah.
Kapalin bhiksho me hridaya kapim atyanta chapalam
Dridham bhaktya baddhva Shiva bhavad adhinam kuru vibho.

21 धृतिस्तम्भाधारां दृढगुणनिबद्धां सगमनां
विचित्रां पद्माढ्यां प्रतिदिवससन्मार्गघटिताम्।
स्मरारे मच्चेतःस्फुटपटकुटीं प्राप्य विशदां
जय स्वामिन् शक्त्या सह शिव गणैः सेवित विभो॥

Dhriti stambhadharam dridha guna nibaddham sagamanam
Vichitram padmadhyam pratidivasa sanmarga ghatitam.
Smarare mach chetah sphuta pata kutim prapya vishadam
Jaya svamin shaktya saha Shiva ganaih sevita vibho.

22 प्रलोभाद्यैरर्थाहरणपरतन्त्रो धनिगृहे
प्रवेशोद्युक्तः सन्भ्रमति बहुधा तस्करपते।
इमं चेतश्चोरं कथमिह सहे शंकर विभो
तवाधीनं कृत्वा मयि निरपराधे कुरु कृपाम्॥

Pralobhadyair artha harana paratantro dhani grihe
Praveshodyuktah san bhramati bahudha taskara pate.
Imam chetash choram katham iha sahe Shankara vibho
Tavadhinam kritva mayi niraparadhe kuru kripam.

23 करोमि त्वत्पूजां सपदि सुखदो मे भव विभो
विधित्वं विष्णुत्वं दिशसि खलु तस्याः फलमिति।
पुनश्च त्वां द्रष्टुं दिवि भुवि वहन्पक्षिमृगता-
मदृष्ट्वा तत्खेदं कथमिह सहे शंकर विभो॥

Karomi tvat pujam sapadi sukhado me bhava vibho
Vidhitvam Vishnutvam dishasi khalu tasyah phalam iti.
Punash cha tvam drashtum divi bhuvi vahan pakshi mrigata-
Madrishtva tat khedam katham iha sahe Shankara vibho.

24 कदा वा कैलासे कनकमणिसौधे सह गणै-
र्वसन्शंभोरग्रे स्फुटघटितमूर्धाञ्जलिपुटः।
विभो साम्ब स्वामिन्परमशिव पाहीति निगद-
न्विधातृणां कल्पान्क्षणमिव विनेष्यामि सुखतः॥

Kada va Kailase kanaka mani saudhe saha ganai-
Rvasan Shambhor agre sphuta ghatita murdhanjali putah.
Vibho Samba svamin Paramashiva pahiti nigada-
Nvidhatrinam kalpan kshanam iva vineshyami sukhatah.

25 स्तवैर्ब्रह्मादीनां जयजयवचोभिर्नियमिनां
गणानां केलीभिर्मदकलमहोक्षस्य ककुदि।
स्थितं नीलग्रीवं त्रिनयनमुमाश्लिष्टवपुषं
कदा त्वां पश्येयं करधृतमृगं खण्डपरशुम्॥

Stavair Brahmadinam jaya jaya vachobhir niyaminam
Gananam kelibhir madakala mahokshasya kakudi.
Sthitam nilagrivam trinayanam Umashlishta vapusham
Kada tvam pashyeyam kara dhrita mrigam khanda parashum.

26 कदा वा त्वां दृष्ट्वा गिरिश तव भव्याङ्घ्रियुगलं
गृहीत्वा हस्ताभ्यां शिरसि नयने वक्षसि वहन्।
समाश्लिष्याघ्राय स्फुटजलजगन्धान्परिमला-
नलाभ्यां ब्रह्माद्यैर्मुदमनुभविष्यामि हृदये॥

Kada va tvam drishtva Girisha tava bhavyanghri yugalam
Grihitva hastabhyam shirasi nayane vakshasi vahan.
Samashlishyaghraya sphuta jalaja gandhan parimala-
Nalabhyam Brahmadyair mudam anubhavishyami hridaye.

27 करस्थे हेमाद्रौ गिरिश निकटस्थे धनपतौ
गृहस्थे स्वर्भूजामरसुरभिचिन्तामणिगणे।
शिरःस्थे शीतांशौ चरणयुगलस्थेऽखिलशुभे
कमर्थं दास्येऽहं भवतु भवदर्थं मम मनः॥

Karasthe hemadrau Girisha nikatasthe dhanapatau
Grihasthe svarbhujamara surabhi chintamani gane.
Shirahsthe shitanshau charana yugalasthekhila shubhe
Kam artham dasyeham bhavatu bhavad artham mama manah.

28 सारूप्यं तव पूजने शिव महादेवेति संकीर्तने
सामीप्यं शिवभक्तिधुर्यजनतासांगत्यसंभाषणे।
सालोक्यं च चराचरात्मकतनुध्याने भवानीपते
सायुज्यं मम सिद्धमत्र भवति स्वामिन्कृतार्थोऽस्म्यहम्॥

Sarupyam tava pujane Shiva Mahadeveti sankirtane
Samipyam Shiva bhakti dhurya janata sangatya sambhashane.
Salokyam cha characharatmaka tanu dhyane Bhavani pate
Sayujyam mama siddham atra bhavati svamin kritarthosmy aham.

29 त्वत्पादाम्बुजमर्चयामि परमं त्वां चिन्तयाम्यन्वहं
त्वामीशं शरणं व्रजामि वचसा त्वामेव याचे विभो।
वीक्षां मे दिश चाक्षुषीं सकरुणां दिव्यैश्चिरं प्रार्थितां
शंभो लोकगुरो मदीयमनसः सौख्योपदेशं कुरु॥

Tvat padambujam archayami paramam tvam chintayamy anvaham
Tvam Isham sharanam vrajami vachasa tvam eva yache vibho.
Viksham me disha chakshushim sakarunam divyaish chiram prarthitam
Shambho loka guro madiya manasah saukhyopadesham kuru.

30 वस्त्रोद्धूतविधौ सहस्रकरता पुष्पार्चने विष्णुता
गन्धे गन्धवहात्मतान्नपचने बर्हिर्मुखाध्यक्षता।
पात्रे काञ्चनगर्भतास्ति मयि चेद्बालेन्दुचूडामणे
शुश्रूषां करवाणि ते पशुपते स्वामिंस्त्रिलोकीगुरो॥

Vastroddhuta vidhau sahasrakarata pushparchane Vishnuta
Gandhe gandhavahatmatanna pachane barhir mukhadhyakshata.
Patre kanchana garbhatasti mayi ched balendu chudamane
Shushrusham karavani te Pashupate svamins triloki guro.

31 नालं वा परमोपकारकमिदं त्वेकं पशूनां पते
पश्यन्कुक्षिगतांश्चराचरगणान्बाह्यस्थितान्रक्षितुम्।
सर्वामर्त्यपलायनौषधमतिज्वालाकरं भीकरं
निक्षिप्तं गरलं गले न गिलितं नोद्गीर्णमेव त्वया॥

Nalam va paramopakarakam idam tv ekam pashunam pate
Pashyan kukshi gatansh charachara ganan bahyasthitan rakshitum.
Sarvamartya palayanaushadham ati jvalakaram bhikaram
Nikshiptam garalam gale na gilitam nodgirnam eva tvaya.

32 ज्वालोग्रः सकलामरातिभयदः क्ष्वेलः कथं वा त्वया
दृष्टः किं च करे धृतः करतले किं पक्वजम्बूफलम्।
जिह्वायां निहितश्च सिद्धघुटिका वा कण्ठदेशे भृतः
किं ते नीलमणिर्विभूषणमयं शंभो महात्मन्वद॥

Jvalograh sakalamarati bhayadah kshvelah katham va tvaya
Drishtah kim cha kare dhritah karatale kim pakva jambu phalam.
Jihvayam nihitash cha siddha ghutika va kantha deshe bhritah
Kim te nila manir vibhushanam ayam Shambho mahatman vada.

33 नालं वा सकृदेव देव भवतः सेवा नतिर्वा नुतिः
पूजा वा स्मरणं कथाश्रवणमप्यालोकनं मादृशाम्।
स्वामिन्नस्थिरदेवतानुसरणायासेन किं लभ्यते
का वा मुक्तिरितः कुतो भवति चेत्किं प्रार्थनीयं तदा॥

Nalam va sakrid eva deva bhavatah seva natir va nutih
Puja va smaranam katha shravanam apy alokanam madrisham.
Svaminn asthira devatanusaranayasena kim labhyate
Ka va muktir itah kuto bhavati chet kim prarthaniyam tada.

34 किं ब्रूमस्तव साहसं पशुपते कस्यास्ति शंभो भव-
द्धैर्यं चेदृशमात्मनः स्थितिरियं चान्यैः कथं लभ्यते।
भ्रश्यद्देवगणं त्रसन्मुनिगणं नश्यत्प्रपञ्चं लयं
पश्यन्निर्भय एक एव विहरत्यानन्दसान्द्रो भवान्॥

Kim brumas tava sahasam Pashupate kasyasti Shambho bhava-
Ddhairyam chedrisham atmanah sthitir iyam chanyaih katham labhyate.
Bhrashyad deva ganam trasan muni ganam nashyat prapancham layam
Pashyan nirbhaya eka eva viharaty ananda sandro bhavan.

35 योगक्षेमधुरंधरस्य सकलश्रेयःप्रदोद्योगिनो
दृष्टादृष्टमतोपदेशकृतिनो बाह्यान्तरव्यापिनः।
सर्वज्ञस्य दयाकरस्य भवतः किं वेदितव्यं मया
शंभो त्वं परमान्तरङ्ग इति मे चित्ते स्मराम्यन्वहम्॥

Yoga kshema dhurandharasya sakala shreyah pradodyogino
Drishtadrishta matopadesha kritino bahyantara vyapinah.
Sarvajnasya daya karasya bhavatah kim veditavyam maya
Shambho tvam paramantaranga iti me chitte smaramy anvaham.

36 भक्तो भक्तिगुणावृते मुदमृतापूर्णे प्रसन्ने मनः-
कुम्भे साम्ब तवाङ्घ्रिपल्लवयुगं संस्थाप्य संवित्फलम्।
सत्त्वं मन्त्रमुदीरयन्निजशरीरागारशुद्धिं वह-
न्पुण्याहं प्रकटीकरोमि रुचिरं कल्याणमापादयन्॥

Bhakto bhakti guna vrite mudamrita purne prasanne manah-
Kumbhe Samba tavanghri pallava yugam sansthapya sanvit phalam.
Sattvam mantram udirayan nija sharira gara shuddhim vaha-
Npunyaham prakatikaromi ruchiram kalyanam apadayan.

37 आम्नायाम्बुधिमादरेण सुमनःसंघाः समुद्यन्मनो
मन्थानं दृढभक्तिरज्जुसहितं कृत्वा मथित्वा ततः।
सोमं कल्पतरुं सुपर्वसुरभिं चिन्तामणिं धीमतां
नित्यानन्दसुधां निरन्तररमासौभाग्यमातन्वते॥

Amnayambudhim adarena sumanah sanghah samudyan mano
Manthanam dridha bhakti rajju sahitam kritva mathitva tatah.
Somam kalpatarum suparva surabhim chintamanim dhimatam
Nityananda sudham nirantara rama saubhagyam atanvate.

38 प्राक्पुण्याचलमार्गदर्शितसुधामूर्तिः प्रसन्नः शिवः
सोमः सद्गणसेवितो मृगधरः पूर्णस्तमोमोचकः।
चेतःपुष्करलक्षितो भवति चेदानन्दपाथोनिधिः
प्रागल्भ्येन विजृम्भते सुमनसां वृत्तिस्तदा जायते॥

Prak punyachala marga darshita sudha murtih prasannah Shivah
Somah sadgana sevito mrigadharah purnas tamo mochakah.
Chetah pushkara lakshito bhavati ched ananda pathonidhih
Pragalbhyena vijrimbhate sumanasam vrittis tada jayate.

39 धर्मो मे चतुरङ्घ्रिकः सुचरितः पापं विनाशं गतं
कामक्रोधमदादयो विगलिताः कालाः सुखाविष्कृतः।
ज्ञानानन्दमहौषधिः सुफलिता कैवल्यनाथे सदा
मान्ये मानसपुण्डरीकनगरे राजावतंसे स्थिते॥

Dharmo me chaturanghrikah sucharitah papam vinasham gatam
Kama krodha madadayo vigalitah kalah sukhavishkritah.
Jnanananda mahaushadhih suphalita kaivalya nathe sada
Manye manasa pundarika nagare raja vatanse sthite.

40 धीयन्त्रेण वचोघटेन कविताकुल्योपकुल्याक्रमै-
रानीतैश्च सदाशिवस्य चरिताम्भोराशिदिव्यामृतैः।
हृत्केदारयुताश्च भक्तिकलमाः साफल्यमातन्वते
दुर्भिक्षान्मम सेवकस्य भगवन्विश्वेश भीतिः कुतः॥

Dhi yantrena vacho ghatena kavita kulyopakulya kramai-
Ranitaish cha Sadashivasya charitambho rashi divyamritaih.
Hrit kedara yutash cha bhakti kalamah saphalyam atanvate
Durbhikshan mama sevakasya bhagavan Vishvesha bhitih kutah.

41 पापोत्पातविमोचनाय रुचिरैश्वर्याय मृत्युंजय
स्तोत्रध्याननतिप्रदक्षिणसपर्यालोकनाकर्णने।
जिह्वाचित्तशिरोङ्घ्रिहस्तनयनश्रोत्रैरहं प्रार्थितो
मामाज्ञापय तन्निरूपय मुहुर्मामेव मा मेऽवचः॥

Papotpata vimochanaya ruchiraishvaryaya Mrityunjaya
Stotra dhyana nati pradakshina saparyalokanakarnane.
Jihva chitta shironghri hasta nayana shrotrair aham prarthito
Mam ajnapaya tan nirupaya muhur mam eva ma mevachah.

42 गाम्भीर्यं परिखापदं घनधृतिः प्राकार उद्यद्गुण-
स्तोमश्चाप्तबलं घनेन्द्रियचयो द्वाराणि देहे स्थितः।
विद्या वस्तुसमृद्धिरित्यखिलसामग्रीसमेते सदा
दुर्गातिप्रियदेव मामकमनोदुर्गे निवासं कुरु॥

Gambhiryam parikha padam ghana dhritih prakara udyad guna-
Stomash chapta balam ghanendriya chayo dvarani dehe sthitah.
Vidya vastu samriddhir ity akhila samagri samete sada
Durgati priya deva mamaka mano durge nivasam kuru.

43 मा गच्छ त्वमितस्ततो गिरिश भो मय्येव वासं कुरु
स्वामिन्नादिकिरात मामकमनःकान्तारसीमान्तरे।
वर्तन्ते बहुशो मृगा मदजुषो मात्सर्यमोहादय-
स्तान्हत्वा मृगयाविनोदरुचितालाभं च संप्राप्स्यसि॥

Ma gachchha tvam itas tato Girisha bho mayy eva vasam kuru
Svaminn adi kirata mamaka manah kantara simantare.
Vartante bahusho mriga mada jusho matsarya mohadaya-
Stan hatva mrigaya vinoda ruchita labham cha samprapsyasi.

44 करलग्नमृगः करीन्द्रभङ्गो
घनशार्दूलविखण्डनोऽस्तजन्तुः।
गिरिशो विशदाकृतिश्च चेतः-
कुहरे पञ्चमुखोऽस्ति मे कुतो भीः॥

Karalagna mrigah karindra bhango
Ghana shardula vikhandanosta jantuh.
Girisho vishadakritish cha chetah-
Kuhare panchamukhosti me kuto bhih.

45 छन्दःशाखिशिखान्वितैर्द्विजवरैः संसेविते शाश्वते
सौख्यापादिनि खेदभेदिनि सुधासारैः फलैर्दीपिते।
चेतःपक्षिशिखामणे त्यज वृथासंचारमन्यैरलं
नित्यं शंकरपादपद्मयुगलीनीडे विहारं कुरु॥

Chhandah shakhi shikhanvitair dvija varaih sansevite shashvate
Saukhyapadini kheda bhedini sudha saraih phalair dipite.
Chetah pakshi shikhamane tyaja vritha sancharam anyair alam
Nityam Shankara pada padma yugali nide viharam kuru.

46 आकीर्णे नखराजिकान्तिविभवैरुद्यत्सुधावैभवै-
राधौतेऽपि च पद्मरागललिते हंसव्रजैराश्रिते।
नित्यं भक्तिवधूगणैश्च रहसि स्वेच्छाविहारं कुरु
स्थित्वा मानसराजहंस गिरिजानाथाङ्घ्रिसौधान्तरे॥

Akirne nakha raji kanti vibhavair udyat sudha vaibhavai-
Radhautepi cha padmaraga lalite hansa vrajair ashrite.
Nityam bhakti vadhu ganaish cha rahasi svechchha viharam kuru
Sthitva manasa raja hansa Girija nathanghri saudhantare.

47 शंभुध्यानवसन्तसङ्गिनि हृदारामेऽघजीर्णच्छदाः
स्रस्ता भक्तिलताच्छटा विलसिताः पुण्यप्रवालश्रिताः।
दीप्यन्ते गुणकोरका जपवचःपुष्पाणि सद्वासना
ज्ञानानन्दसुधामरन्दलहरी संवित्फलाभ्युन्नतिः॥

Shambhu dhyana vasanta sangini hrid arameghajirnach chhadah
Srasta bhakti latach chhata vilasitah punya pravalashritah.
Dipyante guna koraka japa vachah pushpani sadvasana
Jnanananda sudha maranda lahari sanvit phalabhyunnatih.

48 नित्यानन्दरसालयं सुरमुनिस्वान्ताम्बुजाताश्रयं
स्वच्छं सद्द्विजसेवितं कलुषहृत्सद्वासनाविष्कृतम्।
शंभुध्यानसरोवरं व्रज मनोहंसावतंस स्थिरं
किं क्षुद्राश्रयपल्वलभ्रमणसंजातश्रमं प्राप्स्यसि॥

Nityananda rasalayam sura muni svantambujatashrayam
Svachchham sad dvija sevitam kalusha hrit sadvasanavishkritam.
Shambhu dhyana sarovaram vraja mano hansavatansa sthiram
Kim kshudrashraya palvala bhramana sanjata shramam prapsyasi.

49 आनन्दामृतपूरिता हरपदाम्भोजालवालोद्यता
स्थैर्योपघ्नमुपेत्य भक्तिलतिका शाखोपशाखान्विता।
उच्चैर्मानसकायमानपटलीमाक्रम्य निष्कल्मषा
नित्याभीष्टफलप्रदा भवतु मे सत्कर्मसंवर्धिता॥

Anandamrita purita Hara padambhojalavalodyata
Sthairyopaghnam upetya bhakti latika shakhopashakhanvita.
Uchchair manasa kayamana patalim akramya nishkalmasha
Nityabhishta phala prada bhavatu me satkarma sanvardhita.

50 संध्यारम्भविजृम्भितं श्रुतिशिरःस्थानान्तराधिष्ठितं
सप्रेमभ्रमराभिराममसकृत्सद्वासनाशोभितम्।
भोगीन्द्राभरणं समस्तसुमनःपूज्यं गुणाविष्कृतं
सेवे श्रीगिरिमल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम्॥

Sandhyarambha vijrimbhitam shruti shirah sthanantaradhishthitam
Saprema bhramarabhiramam asakrit sadvasana shobhitam.
Bhogindrabharanam samasta sumanah pujyam gunavishkritam
Seve Shrigiri Mallikarjuna mahalingam Shivalingitam.

51 भृङ्गीच्छानटनोत्कटः करिमदग्राही स्फुरन्माधवा-
ह्लादो नादयुतो महासितवपुः पञ्चेषुणा चादृतः।
सत्पक्षः सुमनोवनेषु स पुनः साक्षान्मदीये मनो-
राजीवे भ्रमराधिपो विहरतां श्रीशैलवासी विभुः॥

Bhringich chha natanotkatah kari mada grahi sphuran Madhava-
Hlado nada yuto mahasita vapuh pancheshuna chadritah.
Satpakshah sumano vaneshu sa punah sakshan madiye mano-
Rajive bhramaradhipo viharatam Shrishaila vasi vibhuh.

52 कारुण्यामृतवर्षिणं घनविपद्ग्रीष्मच्छिदाकर्मठं
विद्यासस्यफलोदयाय सुमनःसंसेव्यमिच्छाकृतिम्।
नृत्यद्भक्तमयूरमद्रिनिलयं चञ्चज्जटामण्डलं
शंभो वाञ्छति नीलकंधर सदा त्वां मे मनश्चातकः॥

Karunyamrita varshinam ghana vipad grishmach chhida karmatham
Vidya sasya phalodayaya sumanah sansevyam ichchhakritim.
Nrityad bhakta mayuram adri nilayam chanchaj jata mandalam
Shambho vanchhati nilakandhara sada tvam me manash chatakah.

53 आकाशेन शिखी समस्तफणिनां नेत्रा कलापी नता-
नुग्राहिप्रणवोपदेशनिनदैः केकीति यो गीयते।
श्यामां शैलसमुद्भवां घनरुचिं दृष्ट्वा नटन्तं मुदा
वेदान्तोपवने विहाररसिके तं नीलकण्ठं भजे॥

Akashena shikhi samasta phaninam netra kalapi nata-
Nugrahi pranavopadesha ninadaih kekiti yo giyate.
Shyamam shaila samudbhavam ghana ruchim drishtva natantam muda
Vedantopavane vihara rasike tam Nilakantham bhaje.

54 संध्या घर्मदिनात्ययो हरिकराघातप्रभूतानक-
ध्वानो वारिदगर्जितं दिविषदां दृष्टिच्छटा चञ्चला।
भक्तानां परितोषबाष्पवितर्तिवृष्टिर्मयूरी शिवा
यस्मिन्नुज्ज्वलताण्डवं विजयते तं नीलकण्ठं भजे॥

Sandhya gharma dinatyayo Hari karaghata prabhutanaka-
Dhvano varida garjitam divishadam drishtich chhata chanchala.
Bhaktanam paritosha bashpa vitatir vrishtir mayuri Shiva
Yasminn ujjvala tandavam vijayate tam Nilakantham bhaje.

55 आद्यायामिततेजसे श्रुतिपदैर्वेद्याय साध्याय ते
विद्यानन्दमयात्मने त्रिजगतः संरक्षणोद्योगिने।
ध्येयायाखिलयोगिभिः सुरगणैर्गेयाय मायाविने
सम्यक्ताण्डवसंभ्रमाय जटिने सेयं नतिः शंभवे॥

Adyayamita tejase shruti padair vedyaya sadhyaya te
Vidyanandamayatmane trijagatah sanrakshanodyogine.
Dhyeyayakhila yogibhih sura ganair geyaya mayavine
Samyak tandava sambhramaya jatine seyam natih Shambhave.

56 नित्याय त्रिगुणात्मने पुरजिते कात्यायनीश्रेयसे
सत्यायादिकुटुम्बिने मुनिमनःप्रत्यक्षचिन्मूर्तये।
मायासृष्टजगत्त्रयाय सकलाम्नायान्तसंचारिणे
सायंताण्डवसंभ्रमाय जटिने सेयं नतिः शंभवे॥

Nityaya trigunatmane purajite Katyayani shreyase
Satyayadi kutumbine muni manah pratyaksha chinmurtaye.
Maya srishta jagat trayaya sakalamnayanta sancharine
Sayan tandava sambhramaya jatine seyam natih Shambhave.

57 नित्यं स्वोदरपूरणाय सकलानुद्दिश्य वित्ताशया
व्यर्थं पर्यटनं करोमि भवतः सेवां न जाने विभो।
मज्जन्मान्तरपुण्यपाकबलतस्त्वं शर्व सर्वान्तर-
स्तिष्ठस्येव हि तेन वा पशुपते ते रक्षणीयोऽस्म्यहम्॥

Nityam svodara puranaya sakalan uddishya vittashaya
Vyartham paryatanam karomi bhavatah sevam na jane vibho.
Maj janmantara punya paka balatas tvam Sharva sarvantara-
Stishthasy eva hi tena va Pashupate te rakshaniyosmy aham.

58 एको वारिजबान्धवः क्षितिनभोव्याप्तं तमोमण्डलं
भित्त्वा लोचनगोचरोऽपि भवति त्वं कोटिसूर्यप्रभः।
वेद्यः किं न भवस्यहो घनतरं कीदृग्भवेन्मत्तम-
स्तत्सर्वं व्यपनीय मे पशुपते साक्षात्प्रसन्नो भव॥

Eko varija bandhavah kshiti nabho vyaptam tamo mandalam
Bhittva lochana gocharopi bhavati tvam koti surya prabhah.
Vedyah kim na bhavasy aho ghanataram kidrig bhaven mattama-
Stat sarvam vyapaniya me Pashupate sakshat prasanno bhava.

59 हंसः पद्मवनं समिच्छति यदा नीलाम्बुदं चातकः
कोकः कोकनदप्रियं प्रतिदिनं चन्द्रं चकोरस्तथा।
चेतो वाञ्छति मामकं पशुपते चिन्मार्गमृग्यं विभो
गौरीनाथ भवत्पदाब्जयुगलं कैवल्यसौख्यप्रदम्॥

Hansah padma vanam samichchhati yada nilambudam chatakah
Kokah kokanada priyam pratidinam chandram chakoras tatha.
Cheto vanchhati mamakam Pashupate chin marga mrigyam vibho
Gauri natha bhavat padabja yugalam kaivalya saukhya pradam.

60 रोधस्तोयहृतः श्रमेण पथिकश्छायां तरोर्वृष्टितो
भीतः स्वस्थगृहं गृहस्थमतिथिर्दीनः प्रभुं धार्मिकम्।
दीपं संतमसाकुलश्च शिखिनं शीतावृतस्त्वं तथा
चेतः सर्वभयापहं व्रज सुखं शंभोः पदाम्भोरुहम्॥

Rodhas toya hritah shramena pathikash chhayam taror vrishtito
Bhitah svastha griham grihastham atithir dinah prabhum dharmikam.
Dipam santamasakulash cha shikhinam shitavritas tvam tatha
Chetah sarva bhayapaham vraja sukham Shambhoh padambhoruham.

61 अङ्कोलं निजबीजसंततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिन्धुः सरिद्वल्लभम्।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते॥

Ankolam nija bija santatir ayaskantopalam suchika
Sadhvi naija vibhum lata kshitiruham sindhuh sarid vallabham.
Prapnotiha yatha tatha Pashupateh padaravinda dvayam
Cheto vrittir upetya tishthati sada sa bhaktir ity uchyate.

62 आनन्दाश्रुभिरातनोति पुलकं नैर्मल्यतश्छादनं
वाचाशङ्खमुखे स्थितैश्च जठरापूर्तिं चरित्रामृतैः।
रुद्राक्षैर्भसितेन देव वपुषो रक्षां भवद्भावना-
पर्यङ्के विनिवेश्य भक्तिजननी भक्तार्भकं रक्षति॥

Anandashrubhir atanoti pulakam nairmalyatash chhadanam
Vacha shankha mukhe sthitaish cha jathara purtim charitramritaih.
Rudrakshair bhasitena deva vapusho raksham bhavad bhavana-
Paryanke viniveshya bhakti janani bhaktarbhakam rakshati.

63 मार्गावर्तितपादुका पशुपतेरङ्गस्य कूर्चायते
गण्डूषाम्बुनिषेचनं पुररिपोर्दिव्याभिषेकायते।
किंचिद्भक्षितमांसशेषकबलं नव्योपहारायते
भक्तिः किं न करोत्यहो वनचरो भक्तावतंसायते॥

Marga vartita paduka Pashupater angasya kurchayate
Gandushambu nishechanam puraripor divyabhishekayate.
Kinchid bhakshita mansa shesha kabalam navyopaharayate
Bhaktih kim na karoty aho vanacharo bhaktavatansayate.

64 वक्षस्ताडनमन्तकस्य कठिनापस्मारसंमर्दनं
भूभृत्पर्यटनं नमत्सुरशिरःकोटीरसंघर्षणम्।
कर्मेदं मृदुलस्य तावकपदद्वन्द्वस्य किं वोचितं
मच्चेतोमणिपादुकाविहरणं शंभो सदाङ्गीकुरु॥

Vakshas tadanam antakasya kathinapasmara sammardanam
Bhubhrit paryatanam namat sura shirah kotira sangharshanam.
Karmedam mridulasya tavaka pada dvandvasya kim vochitam
Mach cheto mani paduka viharanam Shambho sadangikuru.

65 वक्षस्ताडनशङ्कया विचलितो वैवस्वतो निर्जराः
कोटीरोज्ज्वलरत्नदीपकलिकानीराजनं कुर्वते।
दृष्ट्वा मुक्तिवधूस्तनोति निभृताश्लेषं भवानीपते
यच्चेतस्तव पादपद्मभजनं तस्येह किं दुर्लभम्॥

Vakshas tadana shankaya vichalito Vaivasvato nirjarah
Kotirojjvala ratna dipa kalika nirajanam kurvate.
Drishtva mukti vadhus tanoti nibhritashlesham Bhavani pate
Yach chetas tava pada padma bhajanam tasyeha kim durlabham.

66 क्रीडार्थं सृजति प्रपञ्चमखिलं क्रीडामृगास्ते जना
मत्कर्माचरितं मया च भवतः प्रीत्यै भवत्येव तत्।
शंभो स्वस्य कुतूहलस्य करणं मच्चेष्टितं निश्चितं
तस्मान्मामकरक्षणं पशुपते कर्तव्यमेव त्वया॥

Kridartham srijati prapancham akhilam krida mrigas te jana
Mat karmacharitam maya cha bhavatah prityai bhavaty eva tat.
Shambho svasya kutuhalasya karanam mach cheshtitam nishchitam
Tasman mamaka rakshanam Pashupate kartavyam eva tvaya.

67 बहुविधपरितोषबाष्पपूर-
स्फुटपुलकाङ्कितचारुभोगभूमिम्।
चिरपदफलकाङ्क्षिसेव्यमानां
परमसदाशिवभावनां प्रपद्ये॥

Bahuvidha paritosha bashpa pura-
Sphuta pulakankita charu bhoga bhumim.
Chira pada phala kankshi sevyamanam
Parama Sadashiva bhavanam prapadye.

68 अमितमुदमृतं मुहुर्दुहन्तीं
विमलभवत्पदगोष्ठमावसन्तीम्।
सदय पशुपते सुपुण्यपाकां
मम परिपालय भक्तिधेनुमेकाम्॥

Amita mudamritam muhur duhantim
Vimala bhavat pada goshtham avasantim.
Sadaya Pashupate supunya pakam
Mama paripalaya bhakti dhenum ekam.

69 जडता पशुता कलङ्किता
कुटिलचरत्वं च नास्ति मयि देव।
अस्ति यदि राजमौले
भवदाभरणस्य नास्मि किं पात्रम्॥

Jadata pashuta kalankita
Kutilacharatvam cha nasti mayi deva.
Asti yadi raja maule
Bhavad abharanasya nasmi kim patram.

70 अरहसि रहसि स्वतन्त्रबुद्ध्या
वरिवसितुं सुलभः प्रसन्नमूर्तिः।
अगणितफलदायकः प्रभुर्मे
जगदधिको हृदि राजशेखरोऽस्ति॥

Arahasi rahasi svatantra buddhya
Varivasitum sulabhah prasanna murtih.
Aganita phala dayakah prabhur me
Jagad adhiko hridi raja shekharosti.

71 आरूढभक्तिगुणकुञ्चितभावचाप-
युक्तैः शिवस्मरणबाणगणैरमोघैः।
निर्जित्य किल्बिषरिपून्विजयी सुधीन्द्रः
सानन्दमावहति सुस्थिरराजलक्ष्मीम्॥

Arudha bhakti guna kunchita bhava chapa-
Yuktaih Shiva smarana bana ganair amoghaih.
Nirjitya kilbisha ripun vijayi sudhindrah
Sanandam avahati susthira raja lakshmim.

72 ध्यानाञ्जनेन समवेक्ष्य तमःप्रदेशं
भित्त्वा महाबलिभिरीश्वरनाममन्त्रैः।
दिव्याश्रितं भुजगभूषणमुद्वहन्ति
ये पादपद्ममिह ते शिव ते कृतार्थाः॥

Dhyananjanena samavekshya tamah pradesham
Bhittva mahabalibhir ishvara nama mantraih.
Divyashritam bhujaga bhushanam udvahanti
Ye pada padmam iha te Shiva te kritarthah.

73 भूदारतामुदवहद्यदपेक्षया श्री-
भूदार एव किमतः सुमते लभस्व।
केदारमाकलितमुक्तिमहौषधीनां
पादारविन्दभजनं परमेश्वरस्य॥

Bhudaratam udavahad yad apekshaya Shri-
Bhudara eva kim atah sumate labhasva.
Kedaram akalita mukti mahaushadhinam
Padaravinda bhajanam Parameshvarasya.

74 आशापाशक्लेशदुर्वासनादि-
भेदोद्युक्तैर्दिव्यगन्धैरमन्दैः।
आशाशाटीकस्य पादारविन्दं
चेतःपेटीं वासितां मे तनोतु॥

Ashapasha klesha durvasanadi-
Bhedodyuktair divya gandhair amandaih.
Ashashatikasya padaravindam
Chetah petim vasitam me tanotu.

75 कल्याणिनं सरसचित्रगतिं सवेगं
सर्वेङ्गितज्ञमनघं ध्रुवलक्षणाढ्यम्।
चेतस्तुरंगमधिरुह्य चर स्मरारे
नेतः समस्तजगतां वृषभाधिरूढ॥

Kalyaninam sarasa chitra gatim savegam
Sarvengitajnam anagham dhruva lakshanadhyam.
Chetas turangam adhiruhya chara smarare
Netah samasta jagatam vrishabhadhirudha.

76 भक्तिर्महेशपदपुष्करमावसन्ती
कादम्बिनीव कुरुते परितोषवर्षम्।
संपूरितो भवति यस्य मनस्तटाक-
स्तज्जन्मसस्यमखिलं सफलं च नान्यत्॥

Bhaktir Mahesha pada pushkaram avasanti
Kadambiniva kurute paritosha varsham.
Sampurito bhavati yasya manas tataka-
Staj janma sasyam akhilam saphalam cha nanyat.

77 बुद्धिः स्थिरा भवितुमीश्वरपादपद्म-
सक्ता वधूर्विरहिणीव सदा स्मरन्ती।
सद्भावनास्मरणदर्शनकीर्तनादि
संमोहितेव शिवमन्त्रजपेन विन्ते॥

Buddhih sthira bhavitum ishvara pada padma-
Sakta vadhur virahiniva sada smaranti.
Sadbhavana smarana darshana kirtanadi
Sammohiteva Shiva mantra japena vinte.

78 सदुपचारविधिष्वनुबोधितां
सविनयां सुहृदं समुपाश्रिताम्।
मम समुद्धर बुद्धिमिमां प्रभो
वरगुणेन नवोढवधूमिव॥

Sadupachara vidhishv anubodhitam
Savinayam suhridam samupashritam.
Mama samuddhara buddhim imam prabho
Vara gunena navodha vadhum iva.

79 नित्यं योगिमनःसरोजदलसंचारक्षमस्त्वत्क्रमः
शंभो तेन कथं कठोरयमराड्वक्षःकवाटक्षतिः।
अत्यन्तं मृदुलं त्वदङ्घ्रियुगलं हा मे मनश्चिन्तय-
त्येतल्लोचनगोचरं कुरु विभो हस्तेन संवाहये॥

Nityam yogi manah saroja dala sancharakshamas tvat kramah
Shambho tena katham kathora yamarad vakshah kavata kshatih.
Atyantam mridulam tvad anghri yugalam ha me manash chintaya-
Ty etal lochana gocharam kuru vibho hastena sanvahaye.

80 एष्यत्येष जनिं मनोऽस्य कठिनं तस्मिन्नटानीति म-
द्रक्षायै गिरिसीम्नि कोमलपदन्यासः पुराभ्यासितः।
नो चेद्दिव्यगृहान्तरेषु सुमनस्तल्पेषु वेद्यादिषु
प्रायः सत्सु शिलातलेषु नटनं शंभो किमर्थं तव॥

Eshyaty esha janim manosya kathinam tasmin nataniti ma-
Drakshayai giri simni komala pada nyasah purabhyasitah.
No ched divya grihantareshu sumanas talpeshu vedyadishu
Prayah satsu shila taleshu natanam Shambho kim artham tava.

81 कंचित्कालमुमामहेश भवतः पादारविन्दार्चनैः
कंचिद्ध्यानसमाधिभिश्च नतिभिः कंचित्कथाकर्णनैः।
कंचित्कंचिदवेक्षणैश्च नुतिभिः कंचिद्दशामीदृशीं
यः प्राप्नोति मुदा त्वदर्पितमना जीवन्स मुक्तः खलु॥

Kanchit kalam Uma Mahesha bhavatah padaravindarchanaih
Kanchid dhyana samadhibhish cha natibhih kanchit katha karnanaih.
Kanchit kanchid avekshanaish cha nutibhih kanchid dasham idrishim
Yah prapnoti muda tvad arpita mana jivan sa muktah khalu.

82 बाणत्वं वृषभत्वमर्धवपुषा भार्यात्वमार्यापते
घोणित्वं सखिता मृदङ्गवहता चेत्यादि रूपं दधौ।
त्वत्पादे नयनार्पणं च कृतवांस्त्वद्देहभागो हरिः
पूज्यात्पूज्यतरः स एव हि न चेत्को वा तदन्योऽधिकः॥

Banatvam vrishabhatvam ardha vapusha bharyatvam aryapate
Ghonitvam sakhita mridanga vahata chetyadi rupam dadhau.
Tvat pade nayanarpanam cha kritavans tvad deha bhago Harih
Pujyat pujyatarah sa eva hi na chet ko va tad anyodhikah.

83 जननमृतियुतानां सेवया देवतानां
न भवति सुखलेशः संशयो नास्ति तत्र।
अजनिममृतरूपं साम्बमीशं भजन्ते
य इह परमसौख्यं ते हि धन्या लभन्ते॥

Janana mriti yutanam sevaya devatanam
Na bhavati sukha leshah sanshayo nasti tatra.
Ajanim amrita rupam Sambam Isham bhajante
Ya iha parama saukhyam te hi dhanya labhante.

84 शिव तव परिचर्यासंनिधानाय गौर्या
भव मम गुणधुर्यां बुद्धिकन्यां प्रदास्ये।
सकलभुवनबन्धो सच्चिदानन्दसिन्धो
सदय हृदयगेहे सर्वदा संवस त्वम्॥

Shiva tava paricharya sannidhanaya Gaurya
Bhava mama guna dhuryam buddhi kanyam pradasye.
Sakala bhuvana bandho sachchidananda sindho
Sadaya hridaya gehe sarvada sanvasa tvam.

85 जलधिमथनदक्षो नैव पातालभेदी
न च वनमृगयायां नैव लुब्धः प्रवीणः।
अशनकुसुमभूषावस्त्रमुख्यां सपर्यां
कथय कथमहं ते कल्पयानीन्दुमौले॥

Jaladhi mathana daksho naiva patala bhedi
Na cha vana mrigayayam naiva lubdhah pravinah.
Ashana kusuma bhusha vastra mukhyam saparyam
Kathaya katham aham te kalpayanindu maule.

86 पूजाद्रव्यसमृद्धयो विरचिताः पूजां कथं कुर्महे
पक्षित्वं न च वा किटित्वमपि न प्राप्तं मया दुर्लभम्।
जाने मस्तकमङ्घ्रिपल्लवमुमाजाने न तेऽहं विभो
न ज्ञातं हि पितामहेन हरिणा तत्त्वेन तद्रूपिणा॥

Puja dravya samriddhayo virachitah pujam katham kurmahe
Pakshitvam na cha va kititvam api na praptam maya durlabham.
Jane mastakam anghri pallavam Umajane na teham vibho
Na jnatam hi pitamahena Harina tattvena tad rupina.

87 अशनं गरलं फणी कलापो
वसनं चर्म च वाहनं महोक्षः।
मम दास्यसि किं किमस्ति शंभो
तव पादाम्बुजभक्तिमेव देहि॥

Ashanam garalam phani kalapo
Vasanam charma cha vahanam mahokshah.
Mama dasyasi kim kim asti Shambho
Tava padambuja bhaktim eva dehi.

88 यदा कृताम्भोनिधिसेतुबन्धनः
करस्थलाधःकृतपर्वताधिपः।
भवानि ते लङ्घितपद्मसंभव-
स्तदा शिवार्चास्तवभावनक्षमः॥

Yada kritambhonidhi setu bandhanah
Karasthaladhah krita parvatadhipah.
Bhavani te langhita padmasambhava-
Stada Shivarcha stava bhavanakshamah.

89 नतिभिर्नुतिभिस्त्वमीश पूजा-
विधिभिर्ध्यानसमाधिभिर्न तुष्टः।
धनुषा मुसलेन चाश्मभिर्वा
वद ते प्रीतिकरं तथा करोमि॥

Natibhir nutibhis tvam Isha puja-
Vidhibhir dhyana samadhibhir na tushtah.
Dhanusha musalena chashmabhir va
Vada te priti karam tatha karomi.

90 वचसा चरितं वदामि शंभो-
रहमुद्योगविधासु तेऽप्रसक्तः।
मनसाकृतिमीश्वरस्य सेवे
शिरसा चैव सदाशिवं नमामि॥

Vachasa charitam vadami Shambho-
Raham udyoga vidhasu teprasaktah.
Manasakritim ishvarasya seve
Shirasa chaiva Sadashivam namami.

91 आद्याविद्या हृद्गता निर्गतासी-
र्द्विद्या हृद्या हृद्गता त्वत्प्रसादात्।
सेवे नित्यं श्रीकरं त्वत्पदाब्जं
भावे मुक्तेर्भाजनं राजमौले॥

Adyavidya hridgata nirgatasi-
Dvidya hridya hridgata tvat prasadat.
Seve nityam shrikaram tvat padabjam
Bhave mukter bhajanam raja maule.

92 दूरीकृतानि दुरितानि दुरक्षराणि
दौर्भाग्यदुःखदुरहंकृतिदुर्वचांसि।
सारं त्वदीयचरितं नितरां पिबन्तं
गौरीश मामिह समुद्धर सत्कटाक्षैः॥

Durikritani duritani duraksharani
Daurbhagya duhkha durahankriti durvachansi.
Saram tvadiya charitam nitaram pibantam
Gaurisha mam iha samuddhara sat katakshaih.

93 सोमकलाधरमौलौ
कोमलघनकंधरे महामहसि।
स्वामिनि गिरिजानाथे
मामकहृदयं निरन्तरं रमताम्॥

Soma kala dhara maulau
Komala ghana kandhare mahamahasi.
Svamini Girija nathe
Mamaka hridayam nirantaram ramatam.

94 सा रसना ते नयने
तावेव करौ स एव कृतकृत्यः।
या ये यौ यो भर्गं
वदतीक्षेते सदार्चतः स्मरति॥

Sa rasana te nayane
Taveva karau sa eva kritakrityah.
Ya ye yau yo Bhargam
Vadatikshete sadarchatah smarati.

95 अतिमृदुलौ मम चरणा-
वतिकठिनं ते मनो भवानीश।
इति विचिकित्सां संत्यज
शिव कथमासीद्गिरौ तथा वेश्मः॥

Atimridulau mama charana-
Vatikathinam te mano Bhavanisha.
Iti vichikitsam santyaja
Shiva katham asid girau tatha veshmah.

96 धैर्याङ्कुशेन निभृतं
रभसादाकृष्य भक्तिशृङ्खलया।
पुरहर चरणालाने
हृदयमदेभं बधान चिद्यन्त्रैः॥

Dhairyankushena nibhritam
Rabhasad akrishya bhakti shrinkhalaya.
Purahara charanalane
Hridaya madebham badhana chid yantraih.

97 प्रचरत्यभितः प्रगल्भवृत्त्या
मदवानेष मनःकरी गरीयान्।
परिगृह्य नयेन भक्तिरज्ज्वा
परम स्थाणुपदं दृढं नयामुम्॥

Pracharaty abhitah pragalbha vrittya
Madavan esha manah kari gariyan.
Parigrihya nayena bhakti rajjva
Parama sthanu padam dridham nayamum.

98 सर्वालंकारयुक्तां सरलपदयुतां साधुवृत्तां सुवर्णां
सद्भिः संस्तूयमानां सरसगुणयुतां लक्षितां लक्षणाढ्याम्।
उद्यद्भूषाविशेषामुपगतविनयां द्योतमानार्थरेखां
कल्याणीं देव गौरीप्रिय मम कविताकन्यकां त्वं गृहाण॥

Sarvalankara yuktam sarala pada yutam sadhu vrittam suvarnam
Sadbhih sanstuyamanam sarasa guna yutam lakshitam lakshanadhyam.
Udyad bhusha vishesham upagata vinayam dyotamanartha rekham
Kalyanim deva Gauri priya mama kavita kanyakam tvam grihana.

99 इदं ते युक्तं वा परमशिव कारुण्यजलधे
गतौ तिर्यग्रूपं तव पदशिरोदर्शनधिया।
हरिब्रह्माणौ तौ दिवि भुवि चरन्तौ श्रमयुतौ
कथं शंभो स्वामिन्कथय मम वेद्योऽसि पुरतः॥

Idam te yuktam va Paramashiva karunya jaladhe
Gatau tiryag rupam tava pada shiro darshana dhiya.
Hari Brahmanau tau divi bhuvi charantau shrama yutau
Katham Shambho svamin kathaya mama vedyosi puratah.

100 स्तोत्रेणालमहं प्रवच्मि न मृषा देवा विरिञ्च्यादयः
स्तुत्यानां गणनाप्रसङ्गसमये त्वामग्रगण्यं विदुः।
माहात्म्याग्रविचारणप्रकरणे धानातुषस्तोमव-
द्धूतास्त्वां विदुरुत्तमोत्तमफलं शंभो भवत्सेवकाः॥

Stotrenalam aham pravachmi na mrisha deva Virinchyadayah
Stutyanam ganana prasanga samaye tvam agraganyam viduh.
Mahatmyagra vicharana prakarane dhanatusha stomava-
Ddhutas tvam vidur uttamottama phalam Shambho bhavat sevakah.

Text checked against: Shivanandalahari, Sri Vani Vilas Press (Sri Vani Vilas Mudrayantralaya), Srirangam 1916 (bound with Saundaryalahari). Meanings, audio and all scripts at nityapaath.com/shivananda-lahari/